राष्ट्रभाषाया हिन्दीभाषाया अपि प्रवर्तने तस्यापूर्वं योगदानम्। गुर्जरदेशीयोऽपि सन् संस्कृतभाषायाः प्रकाण्डपण्डितोऽपि सन् जनकल्याणाय हिन्दीभाषायामेव लेखनप्रचारस्य च माध्यमं चक्रे। हिन्दीभाषाप्रचारेऽपि महोदयस्य महद् योगदानं वर्तते। स वेदाध्ययनम् आर्याणां परमकर्तव्यम्, अमन्यत। अतएव स वेदाध्ययनेऽतीवबलं न्यधात्। वेदा एव आर्यजातेः प्रमाणत्वेन संमान्या ग्रन्थाः सन्ति, इत्येवं सोऽघोषयत्। पञ्चमहायज्ञानां षोडशसंस्काराणाञ्च आवश्यककर्त्तव्यस्य प्रतिपालनम् अकरोत्। भारतीय-गौरव-संरक्षणार्थमेव स 'कृण्वन्तो विश्वमार्यम्' इत्यघोषयत्। संस्कृतभाषायाः प्रचारः प्रसारश्च तस्य जीवनस्य उद्देश्यम्। वैदिकीं दृष्टिमवष्टभ्य यज्ञस्य महत्त्वम्, पशुबलिविरोधम्, सन्ध्योपासनादीनाम् उपयोगित्वम्, निराकारस्य ईश्वरस्य उपासनम्, वेदविरुद्धत्वाद् मूर्तिपूजाया निराकरणम्, पञ्चयज्ञानां षोडशसंस्काराणां च अवश्यकरणीयत्वं प्रत्यपादयत्।

**राष्ट्रोद्धारको दयानन्दः**—आंग्लपरतन्त्रतातः भारतस्य उद्धाराय देशे स्वातन्त्र्यस्य आन्दोलनं जनेषु प्रचारितवान्। महर्षिणा सत्यार्थप्रकाशे स्पष्टरूपेण उद्घोषितं यद् निष्कृतमपि स्वराज्यं श्रेयान् परकीयाद् राज्याद् श्रेयस्करम् अस्ति। वैदिकसंस्कृतिसभ्यतायाः संरक्षणार्थं कृण्वन्तो विश्वमार्यमिति अघोषयत्। भारते शिक्षाप्रसारे तन्मतमनुरुध्य प्रवर्तितानां डी.ए. वी. कालेज-प्रभृतीनां महत्त्वपूर्ण योगदानम्। राष्ट्रियक्रान्तौ तस्य महर्षेः परोक्षं योगदानम् अभूदिति ऐतिह्यविद्भिः निश्चप्रचं प्रतिपाद्यते। हिन्दु-धर्मान्तर्गत-कुरीतीनाम्, अन्धविश्वासानां च यावज्जीवनं विरोधम् अशिक्षयत। स एव हिन्दु-धर्म-विघटनं न्यरोधयत्। शुद्धि-आन्दोलनं प्रवर्त्य यवन-ईसु-मतानुयायिनामपि शुद्धिं विहाय तान् वैदिकधर्मे अदीक्षयत्। एवं वैदिकधर्मस्य श्रेष्ठत्वं प्रत्यपादयत्।

**उपसंहारः**—एवं अस्मिन् विषये धन्या इयं भारतभूमिः यत्र सङ्कटापन्नानां जनानां कृते सन्मार्गं प्रदर्शयितुं अनेके महापुरुषाः काले-काले जन्म अलभन्त। महर्षेः कार्यानुशीलनेन स्फुटमेतद् अवगम्यते यत् स क्रान्तदर्शी, निर्भीकः, निःस्वार्थः, धर्मपरायणः, परार्थैकधीः, दीन-हीन-पतित-रक्षकः, शोषितपोषकः, नारीसम्मान-संवर्धकः, वैदिकधर्म-प्रतिष्ठापकः, गवां रक्षकः, गुरुकुलशिक्षा-पद्धति-प्रवर्तकः, मूर्तिपूजा-अवतारवादादि-दोष-संहारकः, समाजोन्नायकः, राष्ट्रियचेतना-प्रबोधकः, आर्यजातिप्राणरूपः, अहिंसा-सत्य-ब्रह्मचर्यमूर्तिः, कुरतिनिरोधकः, यज्ञादिप्रवर्तकः, भारतोन्नतिसाधकश्च कश्चन महात्मा महायोगी महापुरुषश्च आसीत्। अनेन महापुरुषेण यावज्जीवनं देशजातिसमाजस्य उद्धाराय प्रयत्नः कृतः। क्षमाशीलता तु तस्मिन् ईदृशी आसीत्, यत् विषदातारं जगन्नाथं जानन् अपि सः न केवलं क्षमितवान्, अपितु पञ्चाशत् रूप्यकाणि प्रदाय तं नेपालदेशं प्रेषितवान्। वस्तुतः सः अस्माकं सर्वेषां मानवानां वन्द्यः पूजनीयः, श्रद्धेयः च वर्तते।

❊